अङ्क-२४
जुलाई-दिसम्बर २०१४

**वेदविद्या**
ISSN-2230-8962

# वैदिकवाङ्मये वनस्पतिजगत्

**डॉ. गोविन्दचन्द्रकरः**

पवित्रितायां भारतभुवि ज्ञानप्रदीपो वेदो व्यक्ताव्यक्तविद्याधनानां सततमनुस्यूतानां रहस्याणां विद्योतितानां विवेचनानां विषयबाहुल्येन प्रसिद्धिमागतानां वस्तुजातानाञ्च अनन्योऽनुपमश्च प्रकाशको विविधविद्योन्मोचक इति कीर्त्तिः सर्वत्र निनादिता स्वीकृता विचारमुखेन समादृता च काशते । यस्मात् प्रज्ञां प्रेरणाञ्चादाय निरन्तरं ज्ञानविज्ञानानां विकसनं विभान्वितेन स्वपथोपजायते विस्तीर्य्यते च । अद्य यावदाविष्कृतानां समलङ्कृतानां विज्ञानानां विवेचनभूमिः वेद् इति तद्विज्ञानविद्भिर्विचारपुरस्सरं विषयीक्रियते। आधुनिकजगति पदार्थविज्ञानम्, रसायनविज्ञानम्, जन्तुविज्ञानम्, वनस्पतिविज्ञानम्, शिल्पविज्ञानम्, कृषिविज्ञानम्, ज्योतिर्विज्ञानम्, वृष्टिविज्ञानम्, भूगर्भविज्ञानम्, गणितशास्त्रञ्चेत्यादिभावेन यद्यत् स्वरूपं यच्च प्रारूपं वाऽक्षिलक्षीकृतमाधुनिकजगति समालम्बितञ्च तत्सर्वं वेदसकाशात् लब्धवृत्तान्तं लब्धजन्म चेत्यसंशयम् । किन्तु प्रगत्यवधौ विकासोन्मुखतां प्राप्य वेदोक्तप्राचीनस्वरूपं परिवर्त्तनमासाद्य च विवर्णितं तथ्यं भाषान्तरेण नामान्तरेण च नूतनाय कल्पते स्वरूपं विधत्त इति विचारोन्मुखा प्रतीतिः। **'सर्वज्ञानमयो हि सः'** इति सार्वजनीनः, सर्वमान्यः, सर्वानुमोदनीयश्च सिद्धान्तः, तेनोपक्रमेण वनस्पतिजगत् वैदिकवाङ्मये विचारमहिम्ना प्रभूतां प्राप्य प्रवृत्तेति परिशीलनेन प्रतिपदं प्रत्येति । एतस्य खलु आविष्करणमाधुनिकविज्ञानजगति Botani इत्याख्यया प्रथ्यते अनुसन्धानपद्धतौ तत्सर्वस्य वेदमूलत्वं व्यवस्थाप्यते च । वेदे वनस्पतीनामुपयोगित्वम्, महत्त्वम्, वर्गीकरणम्, विवरणम्, वृक्षरोपणम्, वृक्षरोगनिदानम्, वृक्षचिकित्सा, मानवसमाजस्य रक्षाकर्तृत्वम्, देवत्वम्, उपकारणतत्त्वम्, प्राणतत्त्वम्, चेतनत्वम्, वृक्षाणां मणिसन्धानञ्चेत्यादिभावेन विषयबाहुल्येन विवेचनं समाकलितं समलङ्कृतञ्च विद्यते । तत्रत्यमेतदवधिविवेचनं वनस्पतिजगतः सर्वकालिकत्वं पुष्णाति प्रमाणीकरोति च। वनस्पतिजगत् सृष्टितत्त्वपरिधौ विधातुः सिसृक्षयाऽन्यतमोऽनुदानविशेष इति त्रैकालिकं प्रतिपादनं निरन्तरं ज्ञानविज्ञानमयं चित्तं प्रहिणोति ।

**वनस्पतिः**

वनस्य पतिरिति विग्रहात् **'षष्ठी'**[१] इति सूत्रेण समासे **'पारस्करप्रभृतीनि च सञ्ज्ञायाम्'**[२] इति सूत्रेण सुडागमे (वृन + सुट् + पति = वनस्पति) निष्पन्नोऽयं वनस्पतिशब्दः वृक्षलतादिविभिन्नार्थमादाय

---

[१] पा.सू. २/२/८
[२] पा.सू. ६/१/१५७

व्यवहारजगति प्रसिद्धिमातनोति। सूत्रकृताऽऽचार्यपाणिनिना वनस्य विभागद्वयम् ओषधिवनं वनस्पतिवनञ्चेति भावेन साधितं **विभाषौषधिवनस्पतिभ्यः**[१]। पुनश्च वनस्पतिजगतः श्रेणीविभाजनं विहितम् ओषधिः वनस्पतिश्चेति भावेन। वनस्पतिः वृक्षः इतीमौ द्वौ पर्य्यायवाचिनौ शब्दौ । तथा हि सूत्रम् - ''**अवयवे च प्राण्योषधिवृक्षेभ्यः**''[२] वार्त्तिककृता कात्यायनेनापि पाणिनेराशयो विषयेऽस्मिन् अङ्गीकृतः - ''**बहुप्रकृतिः फलसेनावनस्पतिमृगशकुनि-क्षुद्रजन्तुधान्यतृणानाम्**'' इति। ऋग्वेदे वृक्ष इति तात्पर्येण तस्य शब्दस्य प्रयोगार्हताऽङ्गीकृता। ऐतरेयब्राह्मणे कौषीतकीब्राह्मणे चौषधिभावेन ग्रहणं कृतम् - **प्राणो वनस्पतिः**[३] **प्राणो वै वनस्पतिः**[४] इति। अमरकोषे '**वानस्पत्यः फलैः पुष्पात् तैरपुष्पाद्वनस्पतिः । ओषधिः फलपाकान्ता स्यादबन्ध्यः फलेग्रहिः**'[५]। पुष्पं विना जायमानफले वृक्षे इति वाचस्पतिः। ''वनस्पतीनां सरसां नदीनां तेजोभृतां कान्तिभृतां दिशाञ्च'' इति भट्टिकाव्योक्त्या वनस्पतिशब्दः वनतात्पर्येण प्रोक्तः। श्रीमद्भागवतपुराणे वनस्पतिः, ओषधिः, लता, त्वक्सारः, विरुध-द्रुम इति भावेन वर्गीकरणं दृष्टम् - ''वनस्पत्योषधिलता त्वक्सारा वीरुधो द्रुमाः'' इति ऋग्वेदे यजुर्वेदे अथर्ववेदे च वनस्पतिविषयके विवर्णनं तत्तथ्यमहिम्ना कृतं विद्यते। ऋग्वेदे एतत्कृते वनिन्शब्दस्य प्रयोगः समाहृतः । तदुक्त्या- '**तमोषधीश्च वनिनश्च**[६]' इति । अथर्ववेदे 'वीरुध' इति शब्दः उपपादितः - ''**वनस्पतीन् वानस्पत्यान् ओषधीरुत वीरुधः**[७]'' इति वृक्ष-लता-ओषधिप्रभृतिभिरर्थैः शब्दोऽयं एतद्वाङ्मये प्रसिद्धिं प्राप्तः । वेदोक्तप्रतिपादने वृक्ष-वनस्पतीनां सङ्ख्या विभिन्नतया गुणकार्यादिभेदेन परिगणिता जातेत्यवधिगम्यते। ऋग्वेदे - ६७, यजुर्वेदे - ८२, अथर्ववेदे - २८८ प्रकारकाः विभिन्नाः वनस्पतयः उल्लिखिताः सन्तीति **प्रियव्रतशर्मणा** तदीये **द्रव्यगुणविज्ञाने** विषयीकृतम् ।

**वनस्पतिवर्गीकरणम्**

गुण-धर्म-रङ्ग-फलाधारेण वनस्पतीनां वर्गीकरणमभिलषितं विद्यते।

१. रङ्गाधारेण तद् बभ्रु, शुक्रम्, रोहिणी, पृश्नि, असिक्नी, कृष्णा इति सञ्ज्ञाभिः समाकलनम्। अथर्ववेदे व्युत्पाद्यते - **या बभ्रवो याश्च शुक्रा रोहिणीरुत पृश्नयः ।**
**असिक्नीः कृष्णा ओषधीः सर्वा अच्छावदामसि ॥**[८]

---

[१] पा.सू. ८/४/६
[२] पा.सू. ४/१/४९
[३] कौषी. १२/७
[४] ऐतरेय. २/४, १०
[५] अ.को. श्लो. ६, पृ. १२९
[६] ऋग्वेदः ७/४/५
[७] अथर्ववेदः ८/८/४
[८] अथर्ववेदः ८/७/१

२. स्वरूपस्याकारस्य वाऽऽधारेण - प्रस्तृणती, स्तम्बिनी, एकशुङ्गा, प्रतन्वती, अंशुमती, काण्डिनी, विशाखा इत्युपपादनम् । अथर्ववेदे प्रतिपन्नम् -

**प्रस्तृणती स्तम्बिनीरेकशुङ्गाः प्रतन्वतीरोषधीरा वदामि ।**
**अंशुमतीः काण्डिनीर्या विशाखा ह्वयामि ते वीरुधो वैश्वदेवीरुग्राः पुरुषजीवनीः ॥**[1]

३. गुणधर्माधारेण - जीवला, नघारिषा, अरुन्धती, उन्नयन्ती, मधुमती, प्रचेतस्, मेदिनी, उग्रा, विषदूषणी, बलासनाशनी इति विवर्णितमथर्ववेदे । तथाह -

**जीवलां नघारिषां जीवन्तीमोषधीमहम् ।**
**अरुन्धतीमुन्नयन्तीं पुष्पां मधुमतीमिह हुवेऽस्मा अरिष्टतातये ॥**[2]

४. फलाधारेण - पुष्पवती, प्रसूमती, फलिनी, अफला इति रूपायितमृग्वेदे - तद्यथा- **"याः फलिनीर्या अफला०"**[3]

आधुनिकविज्ञानस्य वैचारिकतथ्येऽपीदं विभाजनं विशदीकृतम् । विश्वस्मिन् ३८५००० सङ्ख्काः वनस्पतयः परिगणिताः । सौकर्यातिशयेन विभाजनं काङ्क्षितम् - तद्भाषया According to a conventional method the entire palnt kingdom has been divided to two division - the non-flowering plants or Cryptogams and flowering plants or Phanerogams.

| PLANT KINGDOM | |
|---|---|
| Cryptogams<br>(non - flowing) अफला | Phanerogams (flowering or spermatophyte)<br>(flowering or spermatophyte) फलिनी |

| Thallophyta | Brophyta | Pteriophyta | Gymnosperm | Angiosperms |
|---|---|---|---|---|
| | | | | |
| Algas<br>(Spirogyra) | Furgi<br>(Macro) | Lichen<br>(Cladonic) | Bacteria<br>(Rhizobium) | |
| | | Monocotylednos<br>(Oryza) | | Dicotyledons<br>(Solanum) |

[1] अथर्ववेदः ८/७/४
[2] अथर्ववेदः ८/७/६
[3] ऋग्वेदः १०/९७/१५

**वनस्पत्युत्पत्तिस्थलम्**

वनस्पतीनामुत्पत्तिस्थलानि सूक्ष्मतयोद्दिष्टानि, यस्मान्मूलतत्त्वमन्वेष्टुं शक्यते । यजुर्वेदे अथर्ववेदे च परिचर्य्यया गोपायितं तथ्यमिदं प्रकाश्यते । पर्वतः, समतलभूमिः,शैवालम्, नदी, पुष्करिणी, सागराभ्यन्तरप्रदेशः, भूगर्भ इति । तथाहि -

**अदो यद्वधावर्त्यवत्कमधि पर्वतात् ।**
**तत् ते कृणोमि भेषजं सुभेषजं यथाससि ॥**[१]
**या रोहन्त्याङ्गिरसीः पर्वतेषु समेषु च ।**
**ता नः पयस्वतीः शिवा ओषधीः सन्तु शं हृदे ॥**[२]
**अवकोल्बा उदकात्मान ओषधयः । व्यृषन्तु दुरितं तीक्ष्णयः ॥**
**उन्मुञ्चन्तीर्विवरुणा उग्रा या विषदूषणीः ॥**[३]
**तदास्रावस्य भेषजं तदु रोगमशीशमत् ।**[४]
**अरुस्राणमिदं महत् पृथिव्या अध्युद्भृतम् ।**[५]

ऋग्वेदीय-यजुर्वेदीयविवेचनानुसारं प्रतीतिर्जायते यद् वनस्पतीनामुत्पत्तिः मानवसृष्टेः त्रियुगं पुरा पुनः तदुत्पत्तिः सहस्राधिकस्थानेभ्यः सङ्गृहीता । तथाहि -

**या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा० ।**[६]
**शतं वो अम्ब धामानि सहस्रमुत वो रुहः० ।**[७]

**वनस्पतिनामकरणम्**

वनस्पतीनां नामकरणं भारतीयविचारधारानुसारं जातमिति पाश्चात्यविद्वांसः समीक्षणपुरस्सरं स्वाभिमतं प्रकटीचक्रुः । Sir William Jones महोदयैरुद्घोषितं यत् लिनियस् (Linnaeus 1707-1778, Swedish Botanist) महोदयेन यदि भारतीयभाषा ज्ञाता स्यात् तर्हि तदनुसारं नामकरणं क्रियते । तदीयया भाषया - "Linnaeus himself would have adopted them, had he known the learned ancient language of this country". एकेन उदाहरणेनालं

---

[१] अथर्ववेदः २/३/१
[२] अथर्ववेदः ८/७/१७
[३] अथर्ववेदः ८/७/९ -१०
[४] अथर्ववेदः २/३/४
[५] अथर्ववेदः २/३/५
[६] ऋग्वेदः १०/९७/१-२
[७] यजुर्वेदः १२/७५-७६

वृक्षोपरि वृक्षः इत्याशयेन 'वृक्षादनी' इति शब्दतात्पर्येण 'वन्दना' इति शब्दः अथर्ववेदे विनियुक्तः तथाहि - **"या मां लक्ष्मीः पतयालूरजुष्टाभिचस्कन्द वन्दनेव वृक्षम् ।"**[१]

**वनस्पतिहरितत्वम्**

वृक्षाणां हरितत्वे कारणमवितत्त्वमिति सिद्धान्तः । अवितत्त्वं नाम रक्षकतत्त्वम्, यत् खलु कोषैः परिपुष्टम् । तस्मात् कारणात् हरितत्वं भातीति विचारपुरस्सरमाविष्करणमाधुनिकविदुषा वैज्ञानिकरीत्या कथ्यते । अथर्ववेदे तथ्यमिदं विषयीकृतं दृश्यते । तथाहि -

**अविर्वै नाम देवता ऋतेनास्ते परीवृता ।**
**तस्या रूपेणेमे वृक्षा हरिता हरितस्रजः ॥**[२]

आधुनिकविज्ञाने वैज्ञानिकाः Wilstater, Stoll, Fischer (1942) महोदयाः CHLOROPHYLL इति विचारस्य तत्तथ्यदिशा आविष्करणं कृतवन्तः । तच्च नवविधम्, यस्य कार्यप्रकारं तद्भाषया वर्णितम् - The function of chlorophyll pigments is to absorb light. When light falls on the green tissue of the plant it causes excitation of chlorophyll pigments leading to generation of energy.

**वनस्पतिसंरक्षणम्**

वनस्पतिः कल्याणकल्पतरुः सार्वकालिकसमाजाभिवृद्धौ जनजीवनपरिवृद्धौ चेति अभ्यर्हितविचारविमर्शाधारेण श्रुतिवाक्यानि विपञ्चीकृतानि विद्यन्ते । ऋग्-यजुः-अथर्ववेदेषु एतत्कृते बहुशो विवर्णनं संशाधितं समधिगतञ्च जायते ।

१. ऋग्वेदे - एतद्विधौ षड् मन्त्राः निगदिताः विद्यन्ते ।

**१. ओषधीरिति मातरः ।**[३]
**२. वीरुधः पारयिष्णवः ।**[४]
**३. नित्यस्तोत्रो वनस्पतिः धीनामन्तः सबर्दुघः ।**[५]

---

[१] अथर्ववेदः ७/१२० (११५)/२
[२] अथर्ववेदः १०/८/३१
[३] ऋग्वेदः १०/९७/४
[४] ऋग्वेदः १०/९७/३
[५] ऋग्वेदः ९/१२/७

**४. वनस्पतिभ्यः पर्याभृतं सहः ।**[१]
**५. ओषधीर्वनस्पतीन् पृथिवीं पर्वतान् अपः ।**
**............ व्रता विसृजन्तो अधि क्षमि ॥**[२]
**६. मा काकम्बीरम् उद् वृहो वनस्पतिम् अशस्तीर्वि हि नीनशः ।**[३]

वृक्षः संसारं पाति, मातृवाच्यः । मनुष्यं सञ्जीवयति, शक्तिचयस्य स्रोतस्वी, परमात्मनः वरदानम् । वनस्पतिमन्तरेण जीवसमाजः स्थातुं नार्हति । वृक्षस्य छेदनमनुचितं कर्म, दण्डनीयेष्वपराधेष्वन्यतमः। वैज्ञानिकाः वनस्पतिजगत् परीक्ष्य समीक्ष्य च तथैवोपदिशन्ति सिद्धान्तं स्थिरीकुर्वन्ति च । तद्वाचा -

७. The human Civilization is entirely at the mercy of Plants. Both man and other animals are so much so dependent on plants that their existence would have been doubtful without the plants.[४]

२. यजुर्वेदे पुनः सप्त मन्त्राः श्रुतिपथे समायान्ति । तद्यथा -

**१. ओषधीरिति मातरः ।**[५]
**२. वीरुधः पारयिष्ण्वः ।**[६]
**३. वनस्पतिः शमिता ।**[७]
**४. वनस्पते..... अस्मत् सखा ।**[८]
**५. मा ओषधीर्हिंसीः ।**[९]
**६. अपः पिन्व, ओषधीर्जिन्व ।**[१०]
**७. ओषध्यास्ते मूलं मा हिंसिषम् ।**[११]

वनस्पतिः माता, रक्षाकर्त्ता, अस्मत्सखः, प्रदूषणं शमयति, वायुमण्डलस्य सर्वविधोपसर्गान् दूरीकरोति नाशयति च। वनस्पतीनां कृते हिंसा त्याज्या। जलसेचनपुरस्सरं वनस्पतीनां परिवर्द्धनं सम्पाद्य सुरक्षा साधनीया ।

---

[१] ऋग्वेदः ६/४७/२७
[२] ऋग्वेदः १०/६५/११
[३] ऋग्वेदः ६/४८/१७
[४] Text Book of Botany, Page 9
[५] यजुर्वेदः १२/७८
[६] यजुर्वेदः १२/७७
[७] यजुर्वेदः २९/३५
[८] यजुर्वेदः २९/५२
[९] यजुर्वेदः ६/२२
[१०] यजुर्वेदः १४/८
[११] यजुर्वेदः १/२५

३. अथर्ववेदे तथ्यस्यास्य प्रकाशनं पञ्चभिः मन्त्रैः साधितम् । इमे च ते मन्त्राः -

**१. वीरुधो वैश्वदेवीः उग्राः पुरुषजीवनीः ।**[1]

**२. उग्रा या विषदूषणीः ...... ओषधीः ।**[2]

**३. वने न वा यो न्यधायि चाकम् ।**[3]

**४. वनस्पतिः सह देवैर्न आगन्**
**रक्षः पिशाचान् अपबाधमानः ।**[4]

**५. वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा ।**[5]

वृक्षेषु वनस्पतिषु च दैवीशक्तिः सञ्चिता वर्त्तते । प्रदूषणं नाशयतीति विचारात् विषदूषणी इति शब्दः प्रयुक्तः। परमात्मना ओषधीनां निर्माणं कृतम् ।

**वृक्षरोपणम्**

विभिन्नासु ऋक्षु वनस्पतीनामुपादेयत्वं कल्याणकारित्वं पुरस्कृत्य च तद्रोपणेऽर्हत्वमुपदिष्टम् । तथाहि - **वनस्पतिं वन आस्थापयध्वं**
**नि षू दधिध्वम् अखनन्त उत्सम् ।**[6]

**वनस्पतिचिकित्सा**

चिकित्सा उपसर्गान् उपद्रवांश्च दूरीकरोति सुस्थतामानयति च । रोगोत्पत्तिः रोगनाशनं संसारस्य कृते सुस्थतायाश्च कृते अन्यदेकमुपपादनम् । वृक्षरोगचिकित्सा अथर्ववेदे समधिगता विद्यते । एकस्मिन् मन्त्रे उपदिष्टं यत् पलालं तिलपीजञ्च चूर्णीकृत्य तन्मिश्रणं वृक्षमूले वितीर्य्यते चेद् वृक्षस्य पुरातनरोगः आरोग्यतां प्राप्नोति। तथाहि -

**बभ्रोरर्जुनकाण्डस्य यवस्य ते पलाल्या तिलस्य तिलपिंज्या ।**
**वीरुत् क्षेत्रियनाशन्यप क्षेत्रियमुच्छतु ॥**[7]

**वानस्पत्यं चेतनम्**

वृक्षेषु जीवनशक्तिः, चेतनत्वम्, जीववचलनादिक्रियाकारकत्वं सर्वं संसक्तं विद्यते । अथर्ववेदे एतद्विवेचनं समधिगन्तव्यं विद्यते । तत्रोक्तं वृक्षः श्वासक्रियां करोति दण्डायमानः सन् शेते । तथाहि -

---

[1] अथर्ववेदः ८/७/४
[2] अथर्ववेदः ८/७/१०
[3] अथर्ववेदः २०/७६/१
[4] अथर्ववेदः १२/३/१५
[5] अथर्ववेदः ६/१२५/१
[6] ऋग्वेदः १०/१०१/११
[7] अथर्ववेदः २/८/३

**१. महद् ब्रह्म ....... येन प्राणन्ति वीरुधः ।**[1]

**२. अस्थुर्वृक्षा ऊर्ध्वस्वप्नाः ।**[2]

मरणादनन्तरं जीवो वनस्पतिस्वरूपं गृह्णाति तच्छरीरं प्राप्नोति प्रविशति । एवञ्च वृक्षस्य चेतनत्वकारणात् जातस्य क्षतस्य परिपूरणमचिरादनुष्ठीयते । तथा हि -

**१. ओषधीषु प्रतितिष्ठा शरीरैः ।**[3]

**२. तस्माद् वनस्पतीनां संवत्सरे वृक्णमपि रोहति ।**[4]

आत्मा वनस्पतिभावेन प्रकाशत इति ऋग्वेदे प्रतिपादितम् । तथा हि -

**चैतति त्मन् अमर्त्योऽवर्त्र ओषधीषु ।**[5]

चेतनपदार्थे जीवे रूपचर्यात् आरभ्य जननक्रियां यावत् यावन्ति कार्याणि अपेक्षितानि वर्त्तन्ते तानि सर्वाणि वनस्पतिशरीरचर्य्यायां समाधारितानि सन्तीति विज्ञानविदः आविष्कुर्वन्ति ।

**वनस्पतेः हितसाधकत्वम्**

वनस्पतिद्वारा मानवसमाजस्य कृते महान् लाभः सम्पादनीयो जायते हितकारकत्वमवधार्यते च । एतद्विषयकं विवर्णनं विवेचनं वा ऋग्यजुर्वेदोपक्रमाद् अधिगृह्यते । तत्र सुवृष्टिः, मधुरं फलम्, वृष्ट्यर्थं मेघस्याकर्षणम्, अग्निसहशमहच्छक्तेरुत्पत्तिश्चेति सर्वं वनस्पतिसाधनतया विचारितम् इमे च ते मन्त्राः-

**१. देवो देवैर्वनस्पतिः हिरण्यपर्णो मधुशाखः सुपिप्पलो देवमिन्द्रम् अवर्धयत् । पृथिवीम् .....अदृथ्ंहीद्० ।**[6]

देदीप्यमानैः नक्षत्रैः वर्तमानः हिरण्यपर्णः मधुशाखः सुन्दरफलः दिव्यगुणप्रदः वनस्पतिः इन्दं वर्धयति प्रकाशं स्पृहयेत्, पृथिवीं समन्तात् धरेत् । अत्र तत्कृते प्रयुक्तानि सर्वाणि विशेषणपदानि जनजीवनहितसाधकार्थप्रतिपादकानि ।

२. **अयमस्मान् वनस्पतिर्मा च हा मा च रीरिषत् स्वस्त्या गृहेभ्य आवसा ।**[7]

वृक्ष-वनस्पतिः अस्मदादीनां रक्षक इत्यसंशयम्। परस्परं प्रतिद्वन्द्वभाविसम्बन्धः कल्याणकारिता समादृता अन्यथा मानवसमाजस्य विनाश एव स्यात् ।

**मानवरक्षकवनस्पतिः**

---

[1] अथर्ववेदः १/३२/१

[2] अथर्ववेदः ६/४४/१

[3] अथर्ववेदः १८/२/७

[4] अथर्ववेदः ८/१०/१८

[5] ऋग्वेदः ६/१२/३

[6] यजुर्वेदः २८/२०

[7] ऋग्वेदः ३/५३/२०

मानवस्य रक्षकत्वेन वनस्पतीनां विवेचनम् ऋग्वेदे साधितम् । उपकारकः, हितकारी, मङ्गलदायक इति भावेन तच्चिन्तनं जातं विद्यते । इयमेव सा ऋक् -

**१. आप ओषधीरुत नोऽवन्तु द्यौर्वना गिरयो वृक्षकेशाः ।**[1]

**२. निष्षिध्वरीरोषधीरापः ।**[2]

**३. निष्षिध्वरीस्त ओषधीः ।**[3]

**अह्लजानदायकवनस्पतिः**

ऋग्वेदे सामवेदे च वनस्पतीनाम**ह्लजान**दायकत्वेनोपकारकत्वं मानवसमाजं प्रति अभ्युपगतं विद्यते। वृक्षः स्वस्वभावसिद्धया प्रक्रियया स्वस्मात् इतरेभ्यः जडपदार्थेभ्यो जलानि आहृत्य अह्लजानं प्रस्तौति, अकुण्ठं प्रहरति । इयं सा प्रवृत्ता प्रक्रिया प्रकाशसंश्लेषणप्रक्रिया (Photosynthesis) इत्युच्यते । वेदमन्त्रेषु समानवायु इति नाम्ना व्यपदिश्यते । जीवसमाजः तद्द्वारा प्राणवायुमागृह्णाति, जीवनं दधाति, सञ्जीवनं समधिगच्छति । तथाहि मन्त्रः -

**तमोषधीर्दधिरे गर्भमृत्वियं,**
**तमापो अग्निं जनयन्त मातरः ।**
**तमित् समानं वनिनश्च वीरुधो - अन्तर्वतीश्च**
**सुवते च विश्वहा ॥**[4]

परिशीलनेन प्रत्येति यत् वृक्षेष्वन्यतमे अश्वत्थवृक्षे **अह्लजानस्य** जारणप्रक्रिया सर्वाधिका वर्त्तते । अतोऽयं वृक्षः देवसदन इति सञ्ज्ञां वैचारिकतथ्यं च लभते । अथर्ववेदे प्रतिपादितम् - "**अश्वत्थो देवसदनः०**"[5] इति आधुनिकविज्ञाने एते वैज्ञानिकाः नाम्ना Arnon, Calvin, Bassham, Rabinowitch, Hatch Slack, von Helmont, Stephen Hales प्रभृतयः १७२७ इत्यतः आरभ्य तथ्यमिदं स्वभाषया प्रकाशितवन्तः । तद्भाषया - "Photosynthesis (Photo = light + Synthesis = to prepare) is a very complex process. It consists of many physical and chemical reaction is an interconnected sequence. The starting raw materials of the process are Chlorophyll, Water, Carbon-dioxide and Light. These materials get-together on the gree plastids present in the green parts of the plant specially the leaves. In presence of

---

[1] ऋग्वेदः ५/४१/११
[2] ऋग्वेदः ८/५९/२
[3] ऋग्वेदः ३/५५/२२
[4] ऋग्वेदः १०/९१/६; सामवेदः १८२४
[5] अथर्ववेदः ६/९५/१

water and carbondioxide and by absorbing light chlorophyll pigments synthesis carbohydrates and in the process oxygen is liberted. - ROBERT HILL (१९३७) महोदयेन Hill reaction इति परीक्षणमाध्यमेनेदं सत्यापितम् ।

$$6\ Co_2 + 6\ H_2O \xrightarrow[\text{Chlorophyll}]{\text{Light energy}} C_6\ H_{12}\ O_6 + 6\ O_2$$

**वनस्पतीनां देवोपकल्पनत्वम्**

वैदिकवाङ्मये वनस्पतिः देवत्वमागृह्णातीति विचारात् कार्यप्रकारमादाय रुद्रकल्पनायां पूजार्हत्वं समभिवन्दनत्वञ्च यजुर्वेदे पुरस्कृतम् । तथाहि -

**नमो॑ वृक्षेभ्यो॒ हरि॑केशेभ्यः । क्षेत्रा॑णां॒ पत॑ये॒ नमो॒ ।**
**वना॑नां॒ पत॑ये॒ नमः॑ । वृ॒क्षाणां॒ पत॑ये॒ नमो॒ ।**
**ओष॑धीनां॒ पत॑ये॒ नमो॒ । कक्षा॑णां॒ पत॑ये॒ नमो॒ ॥**[१]

इदमेव याथार्थ्यमवधारितं यद् भगवान् शिवः विषपानं कृत्वा अमृतविहरणे ख्यातिमर्जितवान् । वृक्षः कार्बन्-डाइ-अक्ससाइड् ($Co_2$) इति अङ्गारकाम्लरूपि-विषपानपुरस्सरं अक्सिजेन् ($O_2$) इति **अम्लजान**रूपममृतं प्रहरति, येन जीवसमाजः स्वप्राणान् सञ्चिनोति। अतो वृक्ष एव रुद्रः। तद्रूपस्य शिवस्याभिवन्दनमभिकाङ्क्षितम् ।

ऋग्-यजुरथर्ववेदोक्तप्रतिपादनाधारेण वनस्पतिजगत् जागतिककल्पनया वर्णनाचातुर्यं विवृद्धिवसूनि च लब्ध्वा चकास्ति । जगदुत्पत्तिः, जगज्ज्ञानम्, जगद्वर्गीकरणम्, नामान्तरः, जगदुपादेयत्वम्, जगत्प्रतिष्ठा, जगद्रक्षा इत्यादिभावेन विभिन्नेन रूपवैभवेनैकस्य जगतः परिकल्पनं रूपवासनया समधिगम्यते सन्धीयते संरच्यते च । तत्सर्वकल्पनं प्रतिपादनं प्रारूपसाधनञ्च वनस्पतिजगतः कृते वैदिकवाङ्मये रमणीयता विहितमिति प्रतिपादनानुसारं स्फुटता प्रतिपदं प्रयाति । वनस्पतिः जगत्कल्याणार्थमुद्दिष्टा विज्ञानप्रतिपादनानुसारमधिगृहीतेति वेदसन्देशः। तत्प्रदर्शितेन ऋजुनैव मार्गेण प्रेरणां प्रचोदनाञ्चावाप्य वर्त्तितव्यञ्चेज्जनजीवनं मधुमयं, निरामयं, सुखमयम्, सन्ततिमयम्, अमृतमयम्, शुभमयम्, शान्तिमयम्, ज्ञेयम्, ध्येयम्, चिरं संस्थेयं भवेदिति विभावयन्तु विद्वांसः॥

**डॉ. गोविन्दचन्द्रकरः**
उपाचार्यः, स्नातकोत्तरव्याकरणविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,श्रीविहारः, पुरी, ओडिशा

[१] यजुर्वेदः १६/१७-१९